## ये विभाषा। (४३/२३१९)

यकारादौ क्ङिति प्रत्यये परतो जनसनखनाम् आकार [1]आदेशो भवति विभाषा। जायते, जन्यते। जाजायते, जञ्जन्यते। सायते, सन्यते। सासायते, संसन्यते। खायते, खन्यते। चाखायते, चङ्खन्यते। जनेः श्यनि 'ज्ञाजनोर्जा' (७.३.७९/२५११) इति नित्यं जादेशो भवति॥

## तनोतेर्यकि। (४४/२७५९)

तनोतेः यकि परतो विभाषा आकार आदेशो भवति। तायते, तन्यते। यकि इति किम्? तन्तन्यते॥

## सनः क्तिचि लोपश्चास्यान्यतरस्याम्। (४५/३३१८)

सनोतेरङ्गस्य [2]क्तिचि प्रत्यये परत आकार आदेशो भवति, लोपश्चास्य अन्यतरस्याम्। सातिः, सन्तिः, सतिः। अन्यतरस्यां[3]ग्रहणं विस्पष्टार्थम्, [4]येसम्बद्धं हि विभाषाग्रहणम् इह निवृत्तम् इत्याशङ्क्येत[5]॥

## आर्धधातुके। (४६/२३०७)

आर्धधातुके इत्यधिकारः। 'न ल्यपि' (६.४.६९/३३३५) इति[6] प्रागेतस्माद् यदित ऊर्ध्वमनुक्रमिष्यामः आर्धधातुके इत्येवं तद् वेदितव्यम्। वक्ष्यति – 'अतो लोपः' (६.४.४८/२३०८)। चिकीर्षिता। जिहीर्षिता। आर्धधातुके इति किम्? भवति। भवतः। अदिप्रभृतिभ्यः शपो लुग्वचनं (२.४.७२/२४२३)[7] प्रत्यय[8]लोपलक्षणप्रतिषेधार्थं स्यात् इत्येतन्न ज्ञापकं शपो लोपाभावस्य।

'यस्य हलः' (६.४.४९/२६३१)। बेभिदिता। बेभिदितुम्। बेभिदितव्यम्। आर्धधातुके इति किम्? बेभिद्यते।

'णेरनिटि' (६.४.५१/२३१३)। कारणा। हारणा। आर्धधातुके इति किम्? कारयति। हारयति।

'आतो लोप इटि च' (६.४.६४/२३७२)। [9]ययतुः। ययुः। ववतुः। ववुः। आर्धधातुके इति किम्? यान्ति। वान्ति।

'घुमास्थागापाजहातिसां हलि' (६.४.६६/२४५२)। दीयते। धीयते। आर्धधातुके इति किम्? अदाताम्। अधाताम्।

'वाऽन्यस्य संयोगादेः' (६.४.६८/२३७८)। स्नेयात्, स्नायात्। आर्धधातुके इति किम्? स्नायात्। आशीर्लिङोऽन्यत्र न भवति।

---

1. इत्यादेशो फ. 2. क्तिच् ह. 3. इति इत्यधिकम् फ. 4. यत्सम्बद्धम् फ. क, यत्सम्बन्धात् ह. 5. आशङ्क्यते ह. 6. यावत् इत्यधिकम् फ. 7. मृष्टः वित्तः इत्यत्र इत्यधिकम् ड. 8. लोप नास्ति ड.फ. 9. पपतुः पपुः क.